Sri Dharma Shastha Sahasranamavali

Nyāsa

अस्य श्री हरिहरपुत्र सहस्रनाम स्तोत्र महामन्त्रस्य – अर्धनारीश्वर ऋषिः – अनुष्टुप् छन्दः – श्रीहरिहरपुत्रो देवता – ह्रां बीजं – ह्रीं शक्तिः – ह्रूं कीलकं – श्रीहरिहरपुत्रप्रसादसिद्ध्यर्थे सहस्रनामजपे विनियोगः ॥

करन्यासः
ह्रां अङ्गुष्ठाभ्यां नमः । ह्रीं तर्जनीभ्यां नमः । ह्रूं मध्यमाभ्यां नमः ।
ह्रैं अनामिकाभ्यां नमः । ह्रौं कनिष्ठाभ्यां नमः । ह्रः करतलकरपृष्ठाभ्यां नमः ॥

अङ्गन्यासः
ह्रां हृदयाय नमः । ह्रीं शिरसे स्वाहा । ह्रूं शिखायै वषट् ।
ह्रैं कवचाय हुम् । ह्रौं नेत्रत्रयाय वौषट् । ह्रः अस्त्राय फट् ।
भूर्भुवस्सुवरोम् इति दिग्बन्धः ॥

Dhyānam

आश्यामकोमलविशालतनुं विचित्र-
वासोवसानम् अरुणोत्पलदामहस्तम् ।
उत्तुङ्गरत्नमकुटं कुटिलाग्रकेशं
शास्तारमिष्टवरदं शरणं प्रपद्ये ॥

Namavali

1. ॐ शिवपुत्राय नमः
2. ॐ महातेजसे नमः
3. ॐ शिवकार्यधुरन्धराय नमः
4. ॐ शिवप्रदाय नमः
5. ॐ शिवज्ञानिने नमः
6. ॐ शैवधर्म सुरक्षिताय नमः
7. ॐ शङ्खधारिणे नमः
8. ॐ सुराध्यक्षाय नमः
9. ॐ चन्द्रमौलये नमः
10. ॐ सुरोत्तमाय नमः
11. ॐ कामेशाय नमः
12. ॐ कामतेजस्विने नमः
13. ॐ कामादिफलसंयुताय नमः
14. ॐ कल्याणाय नमः
15. ॐ कोमलाङ्गाय नमः
16. ॐ कल्याणफलदायकाय नमः
17. ॐ करुणाब्धये नमः
18. ॐ कर्मदक्षाय नमः
19. ॐ करुणारस सागराय नमः
20. ॐ जगत्प्रियाय नमः
21. ॐ जगद्रक्षाय नमः
22. ॐ जगदानन्ददायकाय नमः

23. ॐ जयादिशक्ति संसेव्याय नमः

24. ॐ जनाह्लादाय नमः

25. ॐ जिगीषुकाय नमः

26. ॐ जितेन्द्रियाय नमः

27. ॐ जितक्रोधाय नमः

28. ॐ जितदेवारि सङ्घकाय नमः

29. ॐ जैमिन्यादिमुनि सेव्याय नमः

30. ॐ जरामरण नाशकाय नमः

31. ॐ जनार्दनसुताय नमः

32. ॐ ज्येष्ठाय नमः

33. ॐ ज्येष्ठादिगणसेविताय नमः

34. ॐ जन्महीनाय नमः

35. ॐ जितामोहाय नमः

36. ॐ जनकेनाऽभिपूजिताय नमः

37. ॐ परमेष्ठिने नमः

38. ॐ पशुपतये नमः

39. ॐ पङ्कजासन पूजिताय नमः

40. ॐ पुरहन्त्रे नमः

41. ॐ पुरत्रात्रे नमः

42. ॐ परमैश्वर्यदायकाय नमः

43. ॐ पवनादिसुरैः सेव्याय नमः

44. ॐ पञ्चब्रह्म परायणाय नमः

45. ॐ पार्वतीतनयाय नमः

46. ॐ ब्रह्मणे नमः

47. ॐ परानन्दाय नमः
48. ॐ परात्पराय नमः
49. ॐ ब्रह्मिष्ठाय नमः
50. ॐ ज्ञाननिरताय नमः
51. ॐ गुणागुणनिरूपकाय नमः
52. ॐ गुणाध्यक्षाय नमः
53. ॐ गुणनिधये नमः
54. ॐ गोपालेनाऽभिपूजिताय नमः
55. ॐ गोरक्षकाय नमः
56. ॐ गोधनाय नमः
57. ॐ गजारूढाय नमः
58. ॐ गजप्रियाय नमः
59. ॐ गजग्रीवाय नमः
60. ॐ गजस्कन्धाय नमः
61. ॐ गभस्तये नमः
62. ॐ गोपतये नमः
63. ॐ प्रभवे नमः
64. ॐ ग्रामपालाय नमः
65. ॐ गजाध्यक्षाय नमः
66. ॐ दिग्गजेनाऽभिपूजिताय नमः
67. ॐ गणाध्यक्षाय नमः
68. ॐ गणपतये नमः
69. ॐ गवाम्पतये नमः
70. ॐ अहर्पतये नमः

71. ॐ जटाधराय नमः
72. ॐ जलनिभाय नमः
73. ॐ जैमिन्यैरभिपूजिताय नमः
74. ॐ जलन्धरनिहन्त्रे नमः
75. ॐ शोणाक्षाय नमः
76. ॐ शोणवाससाय नमः
77. ॐ सुराधिपाय नमः
78. ॐ शोकहन्त्रे नमः
79. ॐ शोभाक्षाय नमः
80. ॐ सूर्यतेजसाय नमः
81. ॐ सुरार्चिताय नमः
82. ॐ सुरैर्वन्द्याय नमः
83. ॐ शोणाङ्गाय नमः
84. ॐ शाल्मलीपतये नमः
85. ॐ सज्योतिषे नमः
86. ॐ शरवीरघ्नाय नमः
87. ॐ शरश्चन्द्रनिभाननाय नमः
88. ॐ सनकादिमुनिध्येयाय नमः
89. ॐ सर्वज्ञानप्रदाय नमः
90. ॐ विभवे नमः
91. ॐ हलायुधाय नमः
92. ॐ हंसनिभाय नमः
93. ॐ हाहा हूहू मुखस्तुत्याय नमः
94. ॐ हरये नमः

95. ॐ हरप्रियाय नमः

96. ॐ हंसाय नमः

97. ॐ हर्यक्षासन तत्पराय नमः

98. ॐ पावनाय नमः

99. ॐ पावकनिभाय नमः

100. ॐ भक्तपापविनाशनाय नमः

101. ॐ भसिताङ्गाय नमः

102. ॐ भयत्रात्रे नमः

103. ॐ भानुमते नमः

104. ॐ भयनाशनाय नमः

105. ॐ त्रिपुण्ड्रधारिणे नमः

106. ॐ त्रिनयनाय नमः

107. ॐ त्रिपुण्ड्राङ्कित मस्तकाय नमः

108. ॐ त्रिपुरघ्नाय नमः

109. ॐ देववराय नमः

110. ॐ देवारिकुलसंहृताय नमः

111. ॐ देवसेनाधिपाय नमः

112. ॐ तेजसे नमः

113. ॐ तेजोराशये नमः

114. ॐ दशाननाय नमः

115. ॐ दारुणाय नमः

116. ॐ दोषहन्त्रे नमः

117. ॐ दोर्दण्डाय नमः

118. ॐ दण्डनायकाय नमः

119. ॐ धनुष्पाणये नमः

120. ॐ धराध्यक्षाय नमः

121. ॐ धनिकाय नमः

122. ॐ धर्मवत्सलाय नमः

123. ॐ धर्मज्ञाय नमः

124. ॐ धर्मनिरताय नमः

125. ॐ धनुःशास्त्र परायणाय नमः

126. ॐ स्थूलकर्णाय नमः

127. ॐ स्थूलतनवे नमः

128. ॐ स्थूलाक्षाय नमः

129. ॐ स्थूलबाहुकाय नमः

130. ॐ तनूत्तमाय नमः

131. ॐ तनुत्राणाय नमः

132. ॐ तारकाय नमः

133. ॐ तेजसाम्पतये नमः

134. ॐ योगीश्वराय नमः

135. ॐ योगनिधये नमः

136. ॐ योगिनाय नमः

137. ॐ योगसंस्थिताय नमः

138. ॐ मन्दारवाटिकाय नमः

139. ॐ मत्ताय नमः

140. ॐ मलयाचलवासभुवे नमः

141. ॐ मन्दारकुसुम प्रख्याय नमः

142. ॐ मन्दमारुत सेविताय नमः

143. ॐ महाभासाय नमः

144. ॐ महावक्षसे नमः

145. ॐ मनोहर मदार्चिताय नमः

146. ॐ महोन्नताय नमः

147. ॐ महाकायाय नमः

148. ॐ महानेत्राय नमः

149. ॐ महाहनवे नमः

150. ॐ मरुत्पूज्याय नमः

151. ॐ मानधनाय नमः

152. ॐ मोहनाय नमः

153. ॐ मोक्षदायकाय नमः

154. ॐ मित्राय नमः

155. ॐ मेधाय नमः

156. ॐ महौजस्विने नमः

157. ॐ महावर्षप्रदायकाय नमः

158. ॐ भाषकाय नमः

159. ॐ भाष्य शास्त्रज्ञाय नमः

160. ॐ भानुमते नमः

161. ॐ भानुतेजसे नमः

162. ॐ भवानी पुत्रकाय नमः

163. ॐ भिषजे नमः

164. ॐ भवतारण कारणाय नमः

165. ॐ नीलाम्बराय नमः

166. ॐ नीलनिभाय नमः

167. ॐ नीलग्रीवाय नमः

168. ॐ निरञ्जनाय नमः

169. ॐ नेत्रत्रयाय नमः

170. ॐ निषादज्ञाय नमः

171. ॐ नानारत्नोप शोभिताय नमः

172. ॐ रत्नप्रभाय नमः

173. ॐ रमा पुत्राय नमः

174. ॐ रमया परितोषिताय नमः

175. ॐ राजसेव्याय नमः

176. ॐ राजधनाय नमः

177. ॐ रणदोर्दण्डमण्डिताय नमः

178. ॐ रमणाय नमः

179. ॐ रेणुका सेव्याय नमः

180. ॐ रजनीचरदारणाय नमः

181. ॐ ईशानाय नमः

182. ॐ इभराट्सेव्याय नमः

183. ॐ ईषणत्रयनाशनाय नमः

184. ॐ इडावासाय नमः

185. ॐ हेमनिभाय नमः

186. ॐ हैमप्राकार शोभिताय नमः

187. ॐ हरिहरात्मजाय नमः

188. ॐ हंसाय नमः

189. ॐ हयग्रीवाय नमः

190. ॐ हयप्रियाय नमः

191. ॐ हाटकस्फटिक प्रख्याय नमः

192. ॐ हंसारूढेन सेविताय नमः

193. ॐ वनवासाय नमः

194. ॐ वनाध्यक्षाय नमः

195. ॐ वामदेवाय नमः

196. ॐ वराननाय नमः

197. ॐ वैवस्वत पतये नमः

198. ॐ विष्णवे नमः

199. ॐ विराड्रूपाय नमः

200. ॐ विशालवते नमः

201. ॐ वेणुनादाय नमः

202. ॐ वरग्रीवाय नमः

203. ॐ वराभयकरान्विताय नमः

204. ॐ वर्चस्विने नमः

205. ॐ विपुलग्रीवाय नमः

206. ॐ विपुलाक्षाय नमः

207. ॐ विनोदवते नमः

208. ॐ वैणववनवासाय नमः

209. ॐ वामदेवेन सेविताय नमः

210. ॐ वेत्रहस्ताय नमः

211. ॐ वेदनिधये नमः

212. ॐ वंशदेवाय नमः

213. ॐ वराङ्गकाय नमः

214. ॐ ह्रीङ्काराय नमः

215. ॐ ह्रींमनसे नमः

216. ॐ हृष्टाय नमः

217. ॐ हिरण्याय नमः

218. ॐ हेमसम्भवाय नमः

219. ॐ हुताशाय नमः

220. ॐ हुतनिष्पन्नाय नमः

221. ॐ हुङ्कारकृतिसुप्रभवे नमः

222. ॐ हव्यवाहाय नमः

223. ॐ हव्यकराय नमः

224. ॐ अट्टहासाय नमः

225. ॐ अपराहताय नमः

226. ॐ अणुरूपाय नमः

227. ॐ रूपकराय नमः

228. ॐ अजराय नमः

229. ॐ अतनुरूपकाय नमः

230. ॐ हंसमन्त्राय नमः

231. ॐ हुतभुजे नमः

232. ॐ हेमाम्बराय नमः

233. ॐ सुलक्षणाय नमः

234. ॐ नीपप्रियाय नमः

235. ॐ नीलवाससे नमः

236. ॐ निधिपालाय नमः

237. ॐ निरातपाय नमः

238. ॐ क्रोडहस्ताय नमः

239. ॐ तपस्त्रात्रे नमः

240. ॐ तपोरक्षाय नमः

241. ॐ तपाह्वयाय नमः

242. ॐ मूर्धाभिषिक्ताय नमः

243. ॐ मूर्धभिषजे नमः

244. ॐ मानधनाय नमः

245. ॐ मन्त्ररूपाय नमः

246. ॐ मृडाय नमः

247. ॐ मनवे नमः

248. ॐ मेधाविने नमः

249. ॐ मेधसाय नमः

250. ॐ मुष्णवे नमः

251. ॐ मकराय नमः

252. ॐ मकरालयाय नमः

253. ॐ मार्ताण्डाय नमः

254. ॐ मञ्जुकेशाय नमः

255. ॐ मासपालाय नमः

256. ॐ महौषधये नमः

257. ॐ श्रोत्रियाय नमः

258. ॐ शोभमानाय नमः

259. ॐ सवित्रे नमः

260. ॐ सर्वदेशिकाय नमः

261. ॐ चन्द्रहासाय नमः

262. ॐ शमाय नमः

263. ॐ सक्ताय नमः

264. ॐ शशिभासाय नमः

265. ॐ समाधिकाय नमः

266. ॐ सुदन्ताय नमः

267. ॐ सुकपोलाय नमः

268. ॐ षड्वर्णाय नमः

269. ॐ सम्पदोऽधिपाय नमः

270. ॐ गरळाय नमः

271. ॐ कालकण्ठाय नमः

272. ॐ गोनेत्रे नमः

273. ॐ गोमुखप्रभवे नमः

274. ॐ कौशिकाय नमः

275. ॐ कालदेवाय नमः

276. ॐ क्रोशकाय नमः

277. ॐ क्रौञ्चभेदकाय नमः

278. ॐ क्रियाकराय नमः

279. ॐ कृपालवे नमः

280. ॐ करवीरकरोरुहाय नमः

281. ॐ कन्दर्पदर्पहारिणे नमः

282. ॐ कामदात्रे नमः

283. ॐ कपालकाय नमः

284. ॐ कैलासवासाय नमः

285. ॐ वरदाय नमः

286. ॐ विरोचनाय नमः

287. ॐ विभावसवे नमः

288. ॐ बभ्रुवाहाय नमः

289. ॐ बलाध्यक्षाय नमः

290. ॐ फणामणि विभूषणाय नमः

291. ॐ सुन्दराय नमः

292. ॐ सुमुखाय नमः

293. ॐ स्वच्छाय नमः

294. ॐ सभासदे नमः

295. ॐ सभाकराय नमः

296. ॐ शरनिवृत्ताय नमः

297. ॐ शङ्काप्ताय नमः

298. ॐ शरणागतपालकाय नमः

299. ॐ तीक्ष्ण दंष्ट्राय नमः

300. ॐ दीर्घजिह्वाय नमः

301. ॐ पिङ्गलाक्षाय नमः

302. ॐ पिशाचघ्ने नमः

303. ॐ अभेद्याय नमः

304. ॐ अङ्गदाढ्याय नमः

305. ॐ भोजपालाय नमः

306. ॐ भूपतये नमः

307. ॐ गृध्रनासाय नमः

308. ॐ अविषह्याय नमः

309. ॐ दिग्देहाय नमः

310. ॐ दैन्यदाहकाय नमः

311. ॐ बडवापूरितमुखाय नमः

312. ॐ व्यापकाय नमः

313. ॐ विषमोचकाय नमः

314. ॐ हसन्ताय नमः

315. ॐ समरक्रुद्धाय नमः

316. ॐ पुङ्गवाय नमः

317. ॐ पङ्कजासनाय नमः

318. ॐ विश्वदर्पाय नमः

319. ॐ निश्चिताज्ञाय नमः

320. ॐ नागाभरणभूषिताय नमः

321. ॐ भरताय नमः

322. ॐ भैरवाकाराय नमः

323. ॐ भरणाय नमः

324. ॐ वामनक्रियाय नमः

325. ॐ सिंहास्याय नमः

326. ॐ सिंहरूपाय नमः

327. ॐ सेनापतये नमः

328. ॐ सकारकाय नमः

329. ॐ सनातनाय नमः

330. ॐ सिद्धरुचये नमः

331. ॐ सिद्धधर्मपरायणाय नमः

332. ॐ आदित्यरूपाय नमः

333. ॐ आपद्घ्नाय नमः

334. ॐ अमृताम्भोधिवासभुवे नमः

335. ॐ युवराजाय नमः

336. ॐ योगिवर्याय नमः

337. ॐ उषस्तेजसे नमः

338. ॐ उडुप्रभाय नमः

339. ॐ देवादिदेवाय नमः

340. ॐ दैवज्ञाय नमः

341. ॐ ताम्रोष्ठाय नमः

342. ॐ ताम्रलोचनाय नमः

343. ॐ पिङ्गलाक्षाय नमः

344. ॐ पिञ्छचूडाय नमः

345. ॐ फणामणिविभूषिताय नमः

346. ॐ भुजङ्गभूषणाय नमः

347. ॐ भोगाय नमः

348. ॐ भोगानन्दकराय नमः

349. ॐ अभयाय नमः

350. ॐ पञ्चहस्तेन सम्पूज्याय नमः

351. ॐ पञ्चबाणेन सेविताय नमः

352. ॐ भवाय नमः

353. ॐ शर्वाय नमः

354. ॐ भानुमयाय नमः

355. ॐ प्राजापत्यस्वरूपकाय नमः

356. ॐ स्वच्छन्दाय नमः

357. ॐ छन्दःशास्त्रज्ञाय नमः

358. ॐ दान्ताय नमः

359. ॐ देवमनुप्रभवे नमः

360. ॐ दशभुजे नमः

361. ॐ दलाध्यक्षाय नमः

362. ॐ दानवानां विनाशनाय नमः

363. ॐ सहस्राक्षाय नमः

364. ॐ शतनिष्पन्नाय नमः

365. ॐ शतानन्दाय नमः

366. ॐ समागमाय नमः

367. ॐ गरुडाद्रिवासाय नमः

368. ॐ गम्भीराय नमः

369. ॐ गन्धग्राहाय नमः

370. ॐ गणेश्वराय नमः

371. ॐ गण्डकावासाय नमः

372. ॐ गोमेधाय नमः

373. ॐ गोकुलैः परिवारिताय नमः

374. ॐ परिवेषाय नमः

375. ॐ पदज्ञानिने नमः

376. ॐ प्रियङ्गुद्रुमवासकाय नमः

377. ॐ गुहावासाय नमः

378. ॐ गुरुवराय नमः

379. ॐ वन्दनीयाय नमः

380. ॐ वदान्यकाय नमः

381. ॐ वृत्ताकाराय नमः

382. ॐ वेणुपाणये नमः

383. ॐ वीणादण्डधराय नमः

384. ॐ हराय नमः

385. ॐ हैमीड्याय नमः

386. ॐ होतृसुभगाय नमः

387. ॐ हौत्रज्ञाय नमः

388. ॐ ओजसाम्पतये नमः

389. ॐ पवमानाय नमः

390. ॐ प्रजातन्तुप्रदाय नमः

391. ॐ दण्डविनाशनाय नमः

392. ॐ निमीड्याय नमः

393. ॐ निमिषार्धज्ञाय नमः

394. ॐ निमिषाकारकारणाय नमः

395. ॐ लिगुडाभाय नमः

396. ॐ लिडाकाराय नमः

397. ॐ लक्ष्मीवन्द्याय नमः

398. ॐ वरप्रभवे नमः

399. ॐ इडाज्ञाय नमः

400. ॐ पिङ्गलावासाय नमः

401. ॐ सुषुम्नामध्यसम्भवाय नमः

402. ॐ भिक्षाटनाय नमः

403. ॐ भीमवर्चसे नमः

404. ॐ वरकीर्तये नमः

405. ॐ सभेश्वराय नमः

406. ॐ वाचातीताय नमः

407. ॐ वरनिधये नमः

408. ॐ परिवेत्रे नमः

409. ॐ प्रमाणकाय नमः

410. ॐ अप्रमेयाय नमः

411. ॐ अनिरुद्धाय नमः

412. ॐ अनन्तादित्यवर्चसाय नमः

413. ॐ वेषप्रियाय नमः

414. ॐ विषग्राहाय नमः

415. ॐ वरदानकरोत्तमाय नमः

416. ॐ विपिनाय नमः

417. ॐ वेदसाराय नमः

418. ॐ वेदान्तैः परितोषिताय नमः

419. ॐ वक्रागमाय नमः

420. ॐ वक्रवाचाय नमः

421. ॐ बलदात्रे नमः

422. ॐ विमानवते नमः

423. ॐ वज्रकान्ताय नमः

424. ॐ वंशवराय नमः

425. ॐ वटुरक्षाविशारदाय नमः

426. ॐ वप्रक्रीडाय नमः

427. ॐ विप्रपूज्याय नमः

428. ॐ वेलाराशये नमः

429. ॐ चलालकाय नमः

430. ॐ क्रोडास्याय नमः

431. ॐ क्रोडनेत्राय नमः

432. ॐ कोलाहलाय नमः

433. ॐ कपालभृते नमः

434. ॐ कञ्जरीटाय नमः

435. ॐ मञ्जुवाससे नमः

436. ॐ क्रियमाणाय नमः

437. ॐ क्रियाप्रदाय नमः

438. ॐ क्रीडानाथाय नमः

439. ॐ कीलहस्ताय नमः

440. ॐ क्रोशमानाय नमः

441. ॐ कुलान्तकाय नमः

442. ॐ खनकाय नमः

443. ॐ होतृभागाय नमः

444. ॐ खवासाय नमः

445. ॐ खचराय नमः

446. ॐ खगाय नमः

447. ॐ गणकाय नमः

448. ॐ गुणनिर्दुष्टाय नमः

449. ॐ गुणत्यागाय नमः

450. ॐ कुशाधिपाय नमः

451. ॐ पाटलाय नमः

452. ॐ पत्रधारिणे नमः

453. ॐ पालाशाय नमः

454. ॐ पुत्रवर्धनाय नमः

455. ॐ पितृसच्चरिताय नमः

456. ॐ पेष्टवे नमः

457. ॐ पापभस्मने नमः

458. ॐ पुनश्शुचये नमः

459. ॐ फालनेत्राय नमः

460. ॐ फुल्लकेशाय नमः

461. ॐ फुल्लकल्हारभूषिताय नमः

462. ॐ फणिसेव्याय नमः

463. ॐ पट्टभद्राय नमः

464. ॐ पटवे नमः

465. ॐ वाग्मिने नमः

466. ॐ वयोऽधिकाय नमः

467. ॐ चोरनाट्याय नमः

468. ॐ चोरवेषाय नमः

469. ॐ चोरघ्नाय नमः

470. ॐ चौर्यवर्धनाय नमः

471. ॐ चञ्चलाक्षाय नमः

472. ॐ चामरकाय नमः

473. ॐ मरीचये नमः

474. ॐ मन्दगामिकाय नमः

475. ॐ मृडाभाय नमः

476. ॐ मेषवाहाय नमः

477. ॐ मैथिल्याय नमः

478. ॐ मोचकाय नमः

479. ॐ मनसे नमः

480. ॐ मनुरूपाय नमः

481. ॐ मन्त्रदेवाय नमः

482. ॐ मन्त्रराशये नमः

483. ॐ महादृढाय नमः

484. ॐ स्तूपिज्ञाय नमः

485. ॐ धनदात्रे नमः

486. ॐ देववन्द्याय नमः

487. ॐ तारणाय नमः

488. ॐ यज्ञप्रियाय नमः

489. ॐ यमाध्यक्षाय नमः

490. ॐ इभक्रीडाय नमः

491. ॐ इभेक्षणाय नमः

492. ॐ दधिप्रियाय नमः

493. ॐ दुराधर्षाय नमः

494. ॐ दारुपालाय नमः

495. ॐ दनूजघ्ने नमः

496. ॐ दामोदराय नमः

497. ॐ दामधराय नमः

498. ॐ दक्षिणामूर्तिरूपकाय नमः

499. ॐ शचीपूज्याय नमः

500. ॐ शङ्खकर्णाय नमः

501. ॐ चन्द्रचूडाय नमः

502. ॐ मनुप्रियाय नमः

503. ॐ गुडरूपाय नमः

504. ॐ गुडाकेशाय नमः

505. ॐ कुलधर्मपरायणाय नमः

506. ॐ कालकण्ठाय नमः

507. ॐ गाढगात्राय नमः

508. ॐ गोत्ररूपाय नमः

509. ॐ कुलेश्वराय नमः

510. ॐ आनन्दभैरवाराध्याय नमः

511. ॐ हयमेधफलप्रदाय नमः

512. ॐ दध्यन्नासक्तहृदयाय नमः

513. ॐ गुडान्नप्रीतमानसाय नमः

514. ॐ घृतान्नासक्तहृदयाय नमः

515. ॐ गौराङ्गाय नमः

516. ॐ गर्वभञ्जकाय नमः

517. ॐ गणेशपूज्याय नमः

518. ॐ गगनाय नमः

519. ॐ गणानाम्पतये नमः

520. ॐ गर्जिताय नमः

521. ॐ छद्महीनाय नमः

522. ॐ शशिरदाय नमः

523. ॐ शत्रूणाम्पतये नमः

524. ॐ अङ्गिरसे नमः

525. ॐ चराचरमयाय नमः

526. ॐ शान्ताय नमः

527. ॐ शरभेशाय नमः

528. ॐ शतातपाय नमः

529. ॐ वीराराध्याय नमः

530. ॐ वक्रगमाय नमः

531. ॐ वेदाङ्गाय नमः

532. ॐ वेदसञ्चराय नमः

533. ॐ पर्वतारोहणाय नमः

534. ॐ पूष्णे नमः

535. ॐ परमेशाय नमः

536. ॐ प्रजापतये नमः

537. ॐ भावज्ञाय नमः

538. ॐ भवरोगघ्नाय नमः

539. ॐ भवसागरतारणाय नमः

540. ॐ चिदग्निदेहाय नमः

541. ॐ चिद्रूपाय नमः

542. ॐ चिदानन्दाय नमः

543. ॐ चिदाकृतये नमः

544. ॐ नाट्यप्रियाय नमः

545. ॐ नरपतये नमः

546. ॐ नरनारायणार्चिताय नमः

547. ॐ निषादराजाय नमः

548. ॐ नीहाराय नमः

549. ॐ नेष्ट्रे नमः

550. ॐ निष्ठुरभाषणाय नमः

551. ॐ निम्नप्रियाय नमः

552. ॐ नीलनेत्राय नमः

553. ॐ नीलाङ्गाय नमः

554. ॐ नीलकेशकाय नमः

555. ॐ सिंहाक्षाय नमः

556. ॐ सर्वविघ्नेशाय नमः

557. ॐ सामवेदपरायणाय नमः

558. ॐ सनकादिमुनिध्येयाय नमः

559. ॐ शर्वरीशाय नमः

560. ॐ षडाननाय नमः

561. ॐ सुरूपाय नमः

562. ॐ सुलभाय नमः

563. ॐ स्वर्गाय नमः

564. ॐ शचीनाथेन पूजिताय नमः

565. ॐ काकिनाय नमः

566. ॐ कामदहनाय नमः

567. ॐ दग्धपापाय नमः

568. ॐ धराधिपाय नमः

569. ॐ दामग्रन्थिने नमः

570. ॐ शतस्त्रीशाय नमः

571. ॐ तन्त्रीपालाय नमः

572. ॐ तारकाय नमः

573. ॐ ताम्राक्षाय नमः

574. ॐ तीक्ष्णदंष्ट्राय नमः

575. ॐ तिलभोज्याय नमः

576. ॐ तिलोदराय नमः

577. ॐ माण्डुकर्णाय नमः

578. ॐ मृडाधीशाय नमः

579. ॐ मेरुवर्णाय नमः

580. ॐ महोदराय नमः

581. ॐ मार्ताण्डभैरवाराध्याय नमः

582. ॐ मणिरूपाय नमः

583. ॐ मरुद्वहाय नमः

584. ॐ माषप्रियाय नमः

585. ॐ मधुपानाय नमः

586. ॐ मृणालाय नमः

587. ॐ मोहिनीपतये नमः

588. ॐ महाकामेशनयनाय नमः

589. ॐ माधवाय नमः

590. ॐ मदगर्विताय नमः

591. ॐ मूलाधाराम्बुजावासाय नमः

592. ॐ मूलविद्यास्वरूपकाय नमः

593. ॐ स्वाधिष्ठानमयाय नमः

594. ॐ स्वस्थाय नमः

595. ॐ स्वस्तिवाक्याय नमः

596. ॐ स्रुवायुधाय नमः

597. ॐ मणिपूराब्जनिलयाय नमः

598. ॐ महाभैरवपूजिताय नमः

599. ॐ अनाहताब्जरसिकाय नमः

600. ॐ ह्रीङ्काररसपेशलाय नमः

601. ॐ भ्रूमध्यवासाय नमः

602. ॐ भ्रूकान्ताय नमः

603. ॐ भरद्वाजेन पूजिताय नमः

604. ॐ सहस्राराम्बुजावासाय नमः

605. ॐ सवित्रे नमः

606. ॐ सामवाचकाय नमः

607. ॐ मुकुन्दाय नमः

608. ॐ गुणातीताय नमः

609. ॐ गुणपूज्याय नमः

610. ॐ गुणाश्रयाय नमः

611. ॐ धन्याय नमः

612. ॐ धनभृते नमः

613. ॐ दाहाय नमः

614. ॐ धनदानकराम्बुजाय नमः

615. ॐ महाशयाय नमः

616. ॐ महातीताय नमः

617. ॐ मायाहीनाय नमः

618. ॐ मदर्चिताय नमः

619. ॐ माठराय नमः

620. ॐ मोक्षफलदाय नमः

621. ॐ मद्वैरिकुलनाशनाय नमः

622. ॐ पिङ्गलाय नमः

623. ॐ पिञ्छचूडाय नमः

624. ॐ पिशिताशपवित्रकाय नमः

625. ॐ पायसान्नप्रियाय नमः

626. ॐ पर्वपक्षमासविभाजकाय नमः

627. ॐ वज्रभूषाय नमः

628. ॐ वज्रकायाय नमः

629. ॐ विरिञ्चाय नमः

630. ॐ वरवक्षसाय नमः

631. ॐ विज्ञानकलिकावृन्दाय नमः

632. ॐ विश्वरूपप्रदर्शकाय नमः

633. ॐ डम्भघ्नाय नमः

634. ॐ दमघोषघ्नाय नमः

635. ॐ दासपालाय नमः

636. ॐ तपौजसाय नमः

637. ॐ द्रोणकुम्भाभिषिक्ताय नमः

638. ॐ द्रोहिनाशाय नमः

639. ॐ तपातुराय नमः

640. ॐ महाधीरेन्द्रवरदाय नमः

641. ॐ महासंसारनाशनाय नमः

642. ॐ लाकिनीहाकिनीलब्धाय नमः

643. ॐ लवणाम्भोधितारणाय नमः

644. ॐ काकिनाय नमः

645. ॐ कालपाशघ्नाय नमः

646. ॐ कर्मबन्धविमोचकाय नमः

647. ॐ मोचकाय नमः

648. ॐ मोहनिर्भिन्नाय नमः

649. ॐ भकाराध्याय नमः

650. ॐ बृहत्तनवे नमः

651. ॐ अक्षयाय नमः

652. ॐ अक्रूरवरदाय नमः

653. ॐ वक्रागमविनाशनाय नमः

654. ॐ डाकीनाय नमः

655. ॐ सूर्यतेजस्विने नमः

656. ॐ सर्वभूषाय नमः

657. ॐ सद्गुरवे नमः

658. ॐ स्वतन्त्रेशाय नमः

659. ॐ सर्वतन्त्रेशाय नमः

660. ॐ दक्षिणामूर्तिरूपकाय नमः

661. ॐ चित्सदानन्दकलिकाय नमः

662. ॐ प्रेमरूपाय नमः

663. ॐ प्रियङ्कराय नमः

664. ॐ मिथ्याजगदधिष्ठानाय नमः

665. ॐ मुक्तिदाय नमः

666. ॐ मुक्तिरूपकाय नमः

667. ॐ मुमुक्षवे नमः

668. ॐ कर्मफलदाय नमः

669. ॐ मार्गदक्षाय नमः

670. ॐ कार्मणाय नमः

671. ॐ महाबुद्धाय नमः

672. ॐ महाशुद्धाय नमः

673. ॐ शुकवर्णाय नमः

674. ॐ शुक्रप्रियाय नमः

675. ॐ सोमप्रियाय नमः

676. ॐ सुरप्रीताय नमः

677. ॐ पर्वाराधनतत्पराय नमः

678. ॐ अजपाय नमः

679. ॐ जनहंसाय नमः

680. ॐ हलपाणिप्रपूजिताय नमः

681. ॐ अर्चिताय नमः

682. ॐ वर्चसाय नमः

683. ॐ वाग्मिने नमः

684. ॐ वीरवेषाय नमः

685. ॐ विधुप्रियाय नमः

686. ॐ लास्यप्रियाय नमः

687. ॐ लयकराय नमः

688. ॐ लाभालाभविवर्जिताय नमः

689. ॐ पञ्चाननाय नमः

690. ॐ पञ्चगुरवे नमः

691. ॐ पञ्चयज्ञफलप्रदाय नमः

692. ॐ परशुहस्ताय नमः

693. ॐ पावकेशाय नमः

694. ॐ पर्जन्यसमगर्जिताय नमः

695. ॐ पापारये नमः

696. ॐ परमोदाराय नमः

697. ॐ प्रजेशाय नमः

698. ॐ पङ्कनाशनाय नमः

699. ॐ नष्टकर्मणे नमः

700. ॐ नष्टवैराय नमः

701. ॐ इष्टसिद्धिप्रदायकाय नमः

702. ॐ नागाधीशाय नमः

703. ॐ नष्टपापाय नमः

704. ॐ इष्टनामविधायकाय नमः

705. ॐ सामरस्याय नमः

706. ॐ अप्रमेयाय नमः

707. ॐ पाषण्डिने नमः

708. ॐ पर्वतप्रियाय नमः

709. ॐ पञ्चकृत्याय नमः

710. ॐ परोपेताय नमः

711. ॐ पञ्चपञ्चातिशायिकाय नमः

712. ॐ पद्माक्षाय नमः

713. ॐ पद्मवदनाय नमः

714. ॐ पावकाभाय नमः

715. ॐ प्रियङ्कराय नमः

716. ॐ कार्तस्वराङ्गाय नमः

717. ॐ गौराङ्गाय नमः

718. ॐ गौरीपुत्राय नमः

719. ॐ गणेश्वराय नमः

720. ॐ आश्लिष्टाय नमः

721. ॐ श्लिष्टवपुषे नमः

722. ॐ शीतांशवे नमः

723. ॐ शुभदीधितये नमः

724. ॐ दक्षध्वंसाय नमः

725. ॐ दक्षकराय नमः

726. ॐ वराय नमः

727. ॐ कात्यायनीसुताय नमः

728. ॐ सुमुखाय नमः

729. ॐ मार्गणाय नमः

730. ॐ गर्भाय नमः

731. ॐ गर्वभङ्गाय नमः

732. ॐ कुशासनाय नमः

733. ॐ कुलपालपतये नमः

734. ॐ श्रेष्ठाय नमः

735. ॐ पवमानाय नमः

736. ॐ प्रजाधिपाय नमः

737. ॐ दर्शप्रियाय नमः

738. ॐ दर्विकाराय नमः

739. ॐ दीर्घकायाय नमः

740. ॐ दिवाकराय नमः

741. ॐ भेरीनादप्रियाय नमः

742. ॐ बृन्दाय नमः

743. ॐ बृहत्सेनाय नमः

744. ॐ सुपालकाय नमः

745. ॐ सुब्रह्मणे नमः

746. ॐ ब्रह्मरसिकाय नमः

747. ॐ रसज्ञाय नमः

748. ॐ रजताद्रिभासे नमः

749. ॐ तिमिरघ्नाय नमः

750. ॐ मिहिराभाय नमः

751. ॐ महानीलसमप्रभाय नमः

752. ॐ श्रीचन्दनविलिप्ताङ्गाय नमः

753. ॐ श्रीपुत्राय नमः

754. ॐ श्रीतरुप्रियाय नमः

755. ॐ लाक्षावर्णाय नमः

756. ॐ लसत्कर्णाय नमः

757. ॐ रजनीध्वंसिसन्निभाय नमः

758. ॐ बिन्दुप्रियाय नमः

759. ॐ अम्बिकापुत्राय नमः

760. ॐ बैन्दवाय नमः

761. ॐ बलनायकाय नमः

762. ॐ आपन्नतारकाय नमः

763. ॐ तप्ताय नमः

764. ॐ तप्तकृच्छ्रफलप्रदाय नमः

765. ॐ मरुद्वृधाय नमः

766. ॐ महाखर्वाय नमः

767. ॐ चिरावासाय नमः

768. ॐ शिखिप्रियाय नमः

769. ॐ आयुष्मते नमः

770. ॐ अनघाय नमः

771. ॐ दूताय नमः

772. ॐ आयुर्वेदपरायणाय नमः

773. ॐ हंसाय नमः

774. ॐ परमहंसाय नमः

775. ॐ अवधूताश्रमप्रियाय नमः

776. ॐ आशुवेगाय नमः

777. ॐ अश्वहृदयाय नमः

778. ॐ हयधैर्यफलप्रदाय नमः

779. ॐ सुमुखाय नमः

780. ॐ दुर्मुखाय नमः

781. ॐ विघ्नाय नमः

782. ॐ अविघ्नाय नमः

783. ॐ विघ्ननाशनाय नमः

784. ॐ आर्याय नमः

785. ॐ नाथाय नमः

786. ॐ अर्यमाभासाय नमः

787. ॐ फल्गुनाय नमः

788. ॐ पार्वतीप्रियाय नमः

789. ॐ अरातिघ्नाय नमः

790. ॐ घनग्रीवाय नमः

791. ॐ ग्रीष्मसूर्यसमप्रभाय नमः

792. ॐ किरीटिने नमः

793. ॐ कल्पशास्त्रज्ञाय नमः

794. ॐ कल्पानलविधायकाय नमः

795. ॐ ज्ञानविज्ञानफलदाय नमः

796. ॐ विरिञ्चारिविनाशनाय नमः

797. ॐ वीरमार्ताण्डवरदाय नमः

798. ॐ वीरबाहवे नमः

799. ॐ पूर्वजाय नमः

800. ॐ वीरसिंहासनाय नमः

801. ॐ विज्ञाय नमः

802. ॐ वीरकार्याय नमः

803. ॐ अस्त्रदानवाय नमः

804. ॐ नरवीरसुहृद्भ्रात्रे नमः

805. ॐ नागरत्नविभूषिताय नमः

806. ॐ वाचस्पतये नमः

807. ॐ पुरारातये नमः

808. ॐ संवर्त्ताय नमः

809. ॐ समरेश्वराय नमः

810. ॐ उरुवाग्मिने नमः

811. ॐ उमापुत्राय नमः

812. ॐ उडुलोकसुरक्षकाय नमः

813. ॐ शृङ्गाररससम्पूर्णाय नमः

814. ॐ सिन्दूरतिलकाङ्किताय नमः

815. ॐ कुङ्कुमाङ्कितसर्वाङ्गाय नमः

816. ॐ कालिकेयविनाशनाय नमः

817. ॐ मत्तनागप्रियाय नमः

818. ॐ नीताय नमः

819. ॐ नागगन्धर्वपूजिताय नमः

820. ॐ सुस्वप्नबोधकाय नमः

821. ॐ बोधाय नमः

822. ॐ गौरीदुःस्वप्ननाशनाय नमः

823. ॐ चिन्ताराशिपरिध्वंसिने नमः

824. ॐ चिन्तामणिविभूषिताय नमः

825. ॐ चलाचलजगत्स्रष्ट्रे नमः

826. ॐ चलत्कुण्डलकर्णयुजे नमः

827. ॐ मुकुरास्याय नमः

828. ॐ मूलनिधये नमः

829. ॐ निधिद्वयनिषेविताय नमः

830. ॐ नीराजनप्रीतमनसे नमः

831. ॐ नीरनेत्राय नमः

832. ॐ नयप्रदाय नमः

833. ॐ केदारेशाय नमः

834. ॐ किराताय नमः

835. ॐ कालात्मने नमः

836. ॐ कल्पविग्रहाय नमः

837. ॐ कल्पान्तभैरवाराध्याय नमः

838. ॐ काकपत्रशरायुधाय नमः

839. ॐ कलाकाष्ठास्वरूपाय नमः

840. ॐ ऋतुवर्षादिमासवते नमः

841. ॐ दिनेशमण्डलावासाय नमः

842. ॐ वासवेन प्रपूजिताय नमः

843. ॐ बहुलस्तम्बकर्मज्ञाय नमः

844. ॐ पञ्चाशद्वर्णरूपकाय नमः

845. ॐ चिन्ताहीनाय नमः

846. ॐ चिदाक्रान्ताय नमः

847. ॐ चारुपालाय नमः

848. ॐ बलायुधाय नमः

849. ॐ बन्धूककुसुमप्रख्याय नमः

850. ॐ परगर्वविभञ्जनाय नमः

851. ॐ विद्वत्तमाय नमः

852. ॐ विराधघ्नाय नमः

853. ॐ सचित्राय नमः

854. ॐ चित्रकर्मकाय नमः

855. ॐ सङ्गीतलोलुपमनसे नमः

856. ॐ स्निग्धगम्भीरगर्जिताय नमः

857. ॐ तुङ्गवक्त्राय नमः

858. ॐ स्तवरसाय नमः

859. ॐ अभ्राभाय नमः

860. ॐ भ्रमरेक्षणाय नमः

861. ॐ लीलाकमलहस्ताब्जाय नमः

862. ॐ बालकुन्दविभूषिताय नमः

863. ॐ लोध्रप्रसवशुद्धाभाय नमः

864. ॐ शिरीषकुसुमप्रियाय नमः

865. ॐ त्रासत्राणकराय नमः

866. ॐ तत्त्वाय नमः

867. ॐ तत्त्ववाक्यार्थबोधकाय नमः

868. ॐ वर्षीयसे नमः

869. ॐ विधातव्याय नमः

870. ॐ वेदान्तप्रतिपादकाय नमः

871. ॐ मूलभूताय नमः

872. ॐ मूलतत्त्वाय नमः

873. ॐ मूलकारणविग्रहाय नमः

874. ॐ आदिनाथाय नमः

875. ॐ अक्षयफलपाणये नमः

876. ॐ जन्मपराजिताय नमः

877. ॐ गानप्रियाय नमः

878. ॐ गानलोलाय नमः

879. ॐ महेशाय नमः

880. ॐ विज्ञमानसाय नमः

881. ॐ गिरिजास्तन्यरसिकाय नमः

882. ॐ गिरिराजवरसुताय नमः

883. ॐ पीयूषकुम्भहस्ताब्जाय नमः

884. ॐ पाशत्यागाय नमः

885. ॐ चिरन्तनाय नमः

886. ॐ सुधालालसवक्त्राब्जाय नमः

887. ॐ सुरद्रुमफलेप्सिताय नमः

888. ॐ रत्नहाटकभूषाङ्गाय नमः

889. ॐ रावणादिप्रपूजिताय नमः

890. ॐ कनत्कालेशसुप्रीताय नमः

891. ॐ क्रौञ्चगर्वविनाशनाय नमः

892. ॐ अशेषजनसम्मोहाय नमः

893. ॐ आयुर्विद्याफलप्रदाय नमः

894. ॐ अवबद्धदुकूलाङ्गाय नमः

895. ॐ हारालङ्कृतकन्धराय नमः

896. ॐ केतकीकुसुमप्रीताय नमः

897. ॐ कलभैःपरिवारिताय नमः

898. ॐ केकाप्रियाय नमः

899. ॐ कार्तिकेयाय नमः

900. ॐ सारङ्गनिनदप्रियाय नमः

901. ॐ चातकालापसन्तुष्टाय नमः

902. ॐ चमरीमृगसेविताय नमः

903. ॐ आम्रकूटाद्रिसञ्चाराय नमः

904. ॐ आम्नायफलदायकाय नमः

905. ॐ अक्षसूत्रधृतपाणये नमः

906. ॐ अक्षिरोगविनाशनाय नमः

907. ॐ मुकुन्दपूज्याय नमः

908. ॐ मोहाङ्गाय नमः

909. ॐ मुनिमानसतोषिताय नमः

910. ॐ तैलाभिषिक्तसुशिरसे नमः

911. ॐ तर्जनीमुद्रदर्शनाय नमः

912. ॐ तटातकामनःप्रीताय नमः

913. ॐ तमोगुणविनाशनाय नमः

914. ॐ अनामयाय नमः

915. ॐ अनादर्शाय नमः

916. ॐ अर्जुनाभाय नमः

917. ॐ हुतप्रियाय नमः

918. ॐ षाड्गुण्यपरिसम्पूर्णाय नमः

919. ॐ सप्ताश्वादिग्रहैःस्तुताय नमः

920. ॐ वीतशोकाय नमः

921. ॐ प्रसादज्ञाय नमः

922. ॐ सप्तप्राणवरप्रदाय नमः

923. ॐ सप्तार्चिषे नमः

924. ॐ त्रिनयनाय नमः

925. ॐ त्रिवेणीफलदायकाय नमः

926. ॐ कृष्णवर्मणे नमः

927. ॐ वेदमुखाय नमः

928. ॐ दारुमण्डलमध्यगाय नमः

929. ॐ वीरनूपुरपादाब्जाय नमः

930. ॐ वीरकङ्कणपाणिमते नमः

931. ॐ विश्वमूर्तये नमः

932. ॐ शुद्धमुखाय नमः

933. ॐ शुद्धभस्मानुलेपनाय नमः

934. ॐ शुम्भध्वंसिनीसम्पूज्याय नमः

935. ॐ रक्तकुम्भकुलान्तकाय नमः

936. ॐ निषादादिस्वरप्रीताय नमः

937. ॐ नमस्कारफलप्रदाय नमः

938. ॐ भक्तारिपञ्चतादायिने नमः

939. ॐ सज्जीकृतशरायुधाय नमः

940. ॐ अभयङ्करमन्त्रज्ञाय नमः

941. ॐ कुब्जिकामन्त्रविग्रहाय नमः

942. ॐ धूम्रास्त्राय नमः

943. ॐ उग्रतेजस्विने नमः

944. ॐ दशकण्ठविनाशनाय नमः

945. ॐ आशुगायुधहस्ताब्जाय नमः

946. ॐ गदायुधकराम्बुजाय नमः

947. ॐ पाशायुधसुपाणये नमः

948. ॐ कपालायुधसद्भुजाय नमः

949. ॐ सहस्रमूर्धवदनाय नमः

950. ॐ सहस्रद्वयलोचनाय नमः

951. ॐ नानाहेतिधरपाणये नमः

952. ॐ नानास्थिभूषणप्रियाय नमः

953. ॐ आश्यामकोमलतनवे नमः

954. ॐ आरक्तापाङ्गलोचनाय नमः

955. ॐ द्वादशाहक्रतुप्रीताय नमः

956. ॐ पौण्डरीकफलप्रदाय नमः

957. ॐ आप्तोर्यामक्रतुमयाय नमः

958. ॐ चयनादिफलप्रदाय नमः

959. ॐ पशुबन्धफलदात्रे नमः

960. ॐ वाजपेयात्मदैवताय नमः

961. ॐ आब्रह्मकीटजननावनात्मने नमः

962. ॐ चम्पकप्रियाय नमः

963. ॐ पशुपाशविभागज्ञाय नमः

964. ॐ पतिज्ञानप्रदायकाय नमः

965. ॐ कल्पेश्वराय नमः

966. ॐ कल्पवर्याय नमः

967. ॐ जातवेदःप्रभाकराय नमः

968. ॐ कुम्भीश्वराय नमः

969. ॐ कुम्भपाणये नमः

970. ॐ कुङ्कुमाक्तललाटकाय नमः

971. ॐ शिलीध्रपत्रसङ्काशाय नमः

972. ॐ सिंहवक्त्रप्रमर्दनाय नमः

973. ॐ कोकिलध्वनिताकर्णिने नमः

974. ॐ कालनाशनतत्पराय नमः

975. ॐ नैयायिकमतघ्नाय नमः

976. ॐ बौद्धसङ्घविनाशनाय नमः

977. ॐ हेमाब्जातधृपाणये नमः

978. ॐ होमसन्तुष्टमानसाय नमः

979. ॐ पितृयज्ञस्य फलदाय नमः

980. ॐ पितेव जनरक्षकाय नमः

981. ॐ पदातिकर्मनिरताय नमः

982. ॐ पृषदाज्यप्रदायकाय नमः

983. ॐ महासुरवधोद्युक्ताय नमः

984. ॐ स्वास्त्रप्रत्यस्त्रवर्षकाय नमः

985. ॐ महावर्षतिरोधानाय नमः

986. ॐ नागाधृतकराम्बुजाय नमः

987. ॐ नमःस्वाहा वषड्वौषट्पल्लव प्रतिपादकाय नमः

988. ॐ मिहिरसदृशग्रीवाय नमः

989. ॐ मिहिरसदृशस्तवाय नमः

990. ॐ तन्त्रीवादनहस्ताग्राय नमः

991. ॐ सङ्गीतप्रियमानसाय नमः

992. ॐ चिदंशमुकुरावासाय नमः

993. ॐ मणिकूटाद्रिसञ्चाराय नमः

994. ॐ लीलासञ्चारतनुकाय नमः

995. ॐ लिङ्गशास्त्रप्रवर्तकाय नमः

996. ॐ राकेन्दुद्युतिसम्पन्नाय नमः

997. ॐ यागकर्मफलप्रदाय नमः

998. ॐ मैनाकगिरिसञ्चाराय नमः

999. ॐ मधुवंशविनाशनाय नमः

1000. ॐ तालखण्डपुरावासाय नमः

1001. ॐ तमालनिभतेजसे नमः

1002. ॐ पूर्णा पुष्कलाम्बा समेत श्रीहरिहरपुत्र स्वामिने नमः